Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# ज्योतिषशास्त्रे व्रणगुल्मादिरोगविचारः

डॉ. निर्भय कुमार पाण्डेय
सहायक प्राचार्य (ज्योतिष), रामाधीन मिश्र भास्करोदय संस्कृत महाविद्यालय, देवढिया, बक्सर (अंगीभूत इकाई), का.सिं.द.सं. विश्वविद्यलाय, दरभंगा, बिहार।

**Article Info**
Volume 8, Issue 1
**Page Number :** 143-147
**Publication Issue :**
January-February-2025
**Article History**
Accepted : 20 Jan 2025
Published : 05 Feb 2025

**शोधसारांशः—** आरोग्यं भास्करादिच्छेदिति यमनियमासनप्राणायामध्यानैः साकं सूर्य सिनया रोगात्पत्तिरेव न स्यात्। प्रबल प्रारब्धेन यदि समुत्पद्यते तदा शान्तिकल्पोक्त विधानमेव शरणम्। कथं कस्य रोगस्थ शमनं भवेदिति साध्ये आयुर्विज्ञानेनासाध्ये महामृत्युञ्जयमन्त्रादीनामनुष्ठानेन साकं चिकित्साविधानं शग्णमिति। इत्यामविस्तरेण।

मुख्यशब्दाः— ज्योतिषशास्त्रम्, व्रणगुल्मदिरोगः, शरीरम्, रोगभावः, चन्द्रः।

**शरीरं व्याधिमन्दिरम्—** शरीरं व्याधिमन्दिरं विद्यते। त्रिविकाराणां न्यूनाधिकसंयोगैः विभिन्नरोगाः प्रवर्त्तन्ते। रोगभावः, रोगविचारे सर्वाधिकमुख्योऽस्ति। व्ययभावः मृत्युभावश्चापि मुख्यौ वर्त्तते। यदि कर्के कुम्भे वृश्चिके तन्नवांशे च चन्द्रः गुलिकेन युक्तः स्यात्तदा गुल्मरोगः प्रजायतें।[1]

श. + मं. + रा. तथैव सू. + श. + रा. यदि त्रिकेशैः सम्बद्धाः स्युस्तदा गुल्मादयः कैसरस्य विविध भेदत्वेन मारकयोगेन निधनप्रदाः भवन्ति। रोगाः दोषसंचयभेदेन विभिन्न रूपकाः भवन्ति। फलतः कफपित्तवातजन्याः सहस्रभेदाः प्रवर्त्तन्ते।

तत्र 1. जन्मजातरोगास्त्वसाध्याः भवन्ति।

2. आगन्तुकास्तु वातावरणादि—जन्याः ऋतुविकारजन्याश्च।

3. तात्कालिकविकारसंभवाः आहारविहारजन्यदोषैः समुत्पन्नाः।

4. क्षणिकाः ऋतुविकारजन्याः ज्वरकफवातविकारजन्याः ऋतु परिवर्तनोद्भवाः।

5. दीर्घकालिकाः कैंसरप्रभृतयः कुष्टप्रभृतयः।

6. प्रारब्धजन्याः जन्मजात रोगाश्चापि।

7. घातप्रतिघातजन्याः आघातजन्याः।

8. दुर्घटना जन्याश्च वाहनपतनादयः।

**त्रिविकारानुरोधेन ग्रहर्क्षणां वर्गीकरणम्—** सूर्यमंगलौ—पित्तजन्यरोगकारकौ मेषे सिंहे वृश्चिके धनुषि च पित्तजन्य रोगाः समुत्पद्यन्ते। अग्नितत्वं पित्तविकारश्च सम्बद्ध एव।

शनि राहु केतवः—वातजन्यरोगकारकाः—वृषकन्यामकरेष्वपि—वातजन्यरोगाः सम्बद्धाः। मकरे कफजन्य रोगः भवति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

चन्द्रशुक्रौ–कफविकारकारकौ कुम्भेन वातविकारोऽपि सम्बद्धः गुरुः कफजन्यविकारं च करोति। वातप्रधानः चौतन्यस्य नियन्त्रकः विकारेण कर्कमकरकुम्भमर्मानाः–जलजन्यरोगकारकाः कफ विकारोत्पादकाचेति। यातजन्यं चौतन्य विकारं त्रिदोषकारकत्वेन बुधः त्रिदोषजन्य रोगानुत्पादयति।

राशिषु–मिथुन कन्या कुम्भेषु त्रिदोषजन्य दोषाः रोगाश्च सम्बद्धाः सन्ति।

राशिः + भावः + ग्रहयुतिः + ग्रहदृष्टि + गोचरः + गोचरीय दृष्टिः + अष्नवर्गः = स्पष्ट प्रभावः।

एतेषां शुभत्वेन शुभफलं पापत्वेन रोगाः दोषाश्च प्रवर्त्तन्ते। त्रिकसम्बन्धेन क्रूरसम्बन्धेन रोगाः दोषाश्च जायन्ते। स्पष्ट प्रभाव एव धनान्तर निष्पत्या कारक सापेक्षत्वेन राज्य योगात्प्रारभ्य निधनपर्यन्तं सर्वविधफलं स्वदशान्तर्दशा निष्पत्या प्रयच्छन्ति। द्वयोः त्रयाणां तदधिकैर्वा दोषकारकाणां संयोगवियोगाभ्यां विभिन्न ग्रहर्क्षाणां धातुदोषैः न्यूनाधिकत्वेन विभिन्न साध्यास्तथासाध्याश्च रोगाः समुत्पद्यन्ते।

ग्रहराश्योर्परस्परसम्बन्धेन दोषानं संचयेन विभिन्नविकाराः रोगाश्च प्रवर्तन्ते। मानसिक विकारोऽपि त्रिदोषजन्यः। तत्र बुधेन साकं चन्द्रस्य तथा गुरोश्च महत्त्वमपि समीक्षणीयम्।

असाध्यरोगेषु त्रिदोषानां प्राबल्यं भवति। सर्वत्र त्रिगुणाः त्रिदोषाश् च वर्त्तन्ते परं मुख्यत्वेन वर्गीकरणं प्राप्यते। यदा सूर्ये पित्तेन सह किञ्चित् कफस्य मंगले पित्तेन सह किञ्चित् वातस्य बुधस्य त्रिदोषमयत्वं गुरौ वातेन सह किञ्चित् पित्तस्य शनौ वातेन सह किञ्चित् कफस्य शुक्रे कफेन सह किञ्चित् वातस्य राहै केतौ चापि वातेन सह पित्तस्यापि विकारो संभवति न्यूनत्वेन।

फलदीपिका 14/1 ज्ञायते यत् षष्ठभावादेव त्रिकसम्बन्धेन रोगेशसम्बन्धेन द्वित्र्यादि ग्रहाणां दुर्योग निष्पत्या विभिन्न रोगाः जायन्ते।

**रक्तरोगस्य हेतुः–**

**अश्वत्थ पूर्वोक्तभूरूहाणां छेदो गवां वा हननं वृथैव।**
**उदाहृतो हेतुरसृगदस्य प्रदीयतामत्र तु रत्नधेनुः।।**

अश्वत्थादि वृक्षाणां छेदनं गवां हननं च रक्तरोगस्य हेतुः कथ्यते। कथमिति साम्प्रतिक कालेऽन्वेषणस्य प्रयोजनं विद्यते। जातकतत्वे – 6/21 समारभ्य विभिन्न रोगाः वर्गीकृताः परमाणुर्विज्ञानयोगेन तेषां सलक्षणं विधानं भवितुमर्हति।

**व्रणरोगाः**

भौमेऽलौ गुरुसितद्धीने व्रणपीठिकादि पीडा 6–21।

केत्वर्कजावस्ते व्रणपीठिकादि पीडा 6–22।

लग्नपारौ त्रिके गुन्थिशस्त्रपीड़ा 6–23 ग्रन्थि गुल्म प्रभृतयोऽपि व्रणस्य भेदाः सन्ति।

सार्केऽशीशेऽङ्ग वाष्टमे शिरोव्रणः 6–25

एवं सचन्द्रषष्ठाधिपः लग्ने वाष्टमे मुखव्रणः 6–26

षष्ठेशेन सह कुजः लग्नेऽष्टमे वा कण्ठे व्रणः 6–27

रन्ध्रे मन्दे लग्ने चन्द्रे–उदररोगः

गतत्वेनोदररोगस्यासाध्यत्वं चोध्यम्। 6–60 यदि पञ्चमेशस्य त्रिकसम्बन्धो भवेत्तत्र नीचारि लग्ने सपापे फणिनायके वा मन्देऽष्टमे कुक्षिरूगर्हितः स्यात् 6–90 कुक्षिरोगः।

सज्ञे सोत्थपे गलरोगः 6–80, सोत्थपे तृतीयेश इत्यर्थः। पापग्रहेण सह बुधः तृतीयेशेन युक्तस्तदा कण्ठप्रदे रोगः वाच्यः।

सोत्थे गुलिके विशेषःद्गलरोगः (6–82)। यमारराहवः एकक्षगाः मस्तकरोगः (6–85)। शन्यारौ षष्ठे राह्वर्कदृष्टौ लग्नेशेऽबले दीर्घरोगी (6–58) एवं जातकतत्त्वे विभिन्न भेदानां लक्षणानि घटन्ते। रोगस्य विभिन्न भेदानां लक्षणानि घटन्ते तेषां वर्गीकरणं विधाय निश्चयितुं शक्यते। व्रणस्योनेके भेदाः सन्ति तत्र परीक्षणेन कस्मिन् योगेऽस्फुटित्त व्रणे कैंसरा कर्कटार्बुदस्य विद्रधेः रक्तविकारादीनां विभिन्न रोग भेदानां लक्षणानि घटन्ते। प्रभृतिरोगस्य लक्षणं घटत इति वर्गीकरणं विधाय निश्यचयितुं शक्यते।

जातकपारिजातेऽपि व्रणादि भेदैः विभिन्न रोग भेदाः निर्धारिताः सन्ति तेषु व्रणयोगाः दीर्घरोगीयोगाश्च निरूपिताः! यदि ष.भा. + मं. + सूर्यस्य दृष्टिः + निर्बलः लग्नेशः = दीर्घरोगी।[3] शनिः चन्द्रः मंगलश्च त्रयो ग्रहाः 2, 4, 10 भावस्थास्तदा व्रणाच्छिद्रे कृमिपातेन निधनम्।[4]

**कः ग्रहः कथं मरणं प्रयच्छतीति फलदीपिकाकारेण निरूपितं यथा**

**जातो गच्छति येन केन मरणं वक्ष्येऽथ तत्कारणम्।**

**रन्ध्रस्थैस्तदवेक्षकैर्बलवता तस्योक्त रोगैर्मृतिः।।**

दशान्तर्दशाकाल एत योगप्रदः निधनप्रदश्च योऽष्टमस्थः वाष्टमं प्रपश्यति तेषु यः बलवत्तरस्तस्य धातुकोपेन निधनं विज्ञेयम्। अस्य त्रिविध परीक्षणैः निर्धारणं गम्यम्।

अ.भा. + शनिः तथैव स.भा. + मंगलः—तृतीये वर्षे व्रणरोगः।[5]

राहुः + अष्टमेशः यदि स्वनवांशस्थः यद्यष्टमान्नवमस्थः पंचमस्थो वा तदा 18 वा 22 वर्षे ग्रन्थिरोगः प्रमेहश्च पीडयति।

उपर्युक्ताः व्रणग्रन्थि गण्डतापगण्डरक्तविकार विद्राधिस्तथार्बुदादयः रोगाः क्रूरग्रहयोगैः युत्यादिभिः त्रिकसम्बन्धेन त्रिकेश सम्बन्धेन चं श. गं. रा. सूर्यादीनां विकारैः कैंसररोगरूपेण परिणामिताः सन्तः त्वसाध्यत्वं प्राप्नुवन्ति।

**श्रीपतिप्रमाणेन ज्ञायते यत्कथं ग्रहदोषः पीडयतीति—**

**देवब्राह्मणवन्दाद् गुरुवचः सम्पादनात्प्रत्यहम्।**

**साधूनामधि भाषाणातिरथाच्छेयः कथाकर्णनात् ।।**

**होणादध्वरदर्शनाच्छुचिमनो भावाज्जपाद् दानतो।**

**न कुर्वन्तिकदाविदेव पुरुषस्येचं ग्रहाः पीडनम् ।।**

**विभिन्नरोगाः**

**स्वर्भानुह्वदिताप कुष्ठविगतिर्व्याधिं विपं कृत्रिमम्।**

**पादार्ति च पिशाचपन्नगभयं भार्यातनूजापदम्।।**

**चन्द्रोरूधिरसहायो भाग्यं समुपेत्यमातरं हन्यात्।**

**कुर्य्याच्च विकलगात्रं सव्रणदेहं समृद्धं च।।**

एवं 14/11, सारावल्याम् 32/36, 34/74—75

जातकतत्त्वम् 6/21—25, 6/34—38, 6/39, 6/58—61, 6/68, 6/73—79।

प्रभृतिषु व्रणरोगाः घातजन्यत्रव्रणरोगाः गण्डमालादयश्च निरूपिताः। गुल्मादयोऽपि निरूपिताः। जातकपारिजातेऽपि—13/71, 78 तथा बृहत्पाराशरहोराशास्त्रे 18/13—19 गुल्मादयः निरूपिताः। अस्मिन्नेव 18/8 तथा जातकतत्त्वे 6 अध्याये कुष्ठादीनामपि वर्णनं प्राप्यते।

**आयुर्दायपरीक्षणं—** ज्योतिषेनायुर्वेदेन च कर्तव्यम्। बलप्रमाणं शरीरान्मानसिकं चापि ज्योतिर्विज्ञान मूलेनायुर्वेदयोगेन च परीक्षणी्। दोषप्रमाण परीक्षणं ज्योतिषेनावगम्यायुर्विज्ञानयोगेन कर्त्तवम्। चरकसंहितोक्त विधानेन वृहत्संहितोक्तेन च छायापरीक्षणमपि कर्त्तव्यम्। तदनुरोधेन शुभाशुभं निश्चित्य शामक विधानं प्रयोज्यमिति। यतः स्वस्थपुरुषस्य त्रयोगुणाश्चाविकृता एव भवन्ति। कथितमपि—

**समदोषः समाग्निश्च समधातु मलक्रियः।**

**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।**

नियतमरणख्यापर्क लिङ्गमरिष्टमिति— माधवनिदानम् अतएव ज्योतिषेन रोगस्य पूर्वाभिज्ञानं साध्यात्वमसाध्यत्वं परीक्षयितुं विधानमायुर्विज्ञानंऽपि समुपलभ्यते। प्रारब्धजन्य प्रभावेण रोगस्य असाध्यत्वं प्राचीनैः संकेतितमेव परं कथमिति परीक्षणीयमेव। यथा—

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते।**

**तच्छान्तिरौषधैर्दानैर्जपहोम क्रियादिभिः।।**

इत्यनेन शामकविधानस्य संकेतोऽपि प्राप्यते।

**क्षयरोगः**

गदावली प्रकरणम् अ. 3, श्लो. 19–90

जातकपारिजातः अ. 6, श्लो. 95

सर्वार्थचिन्तामणिः अ. 5, श्लो. 39

जातकपारिजातः अ. 6

जातकतत्त्वम् पाठविवेकः, सूत्र 48–50

महर्षि कात्यायनस्य चिकित्साज्योतिषम् पृ. 92तः, 34तः, 35

ज्योतिषशास्त्र में रोगविचार पृ. 117, प्रो. शुकदेव चतुर्वेदी, पृ. 148, पृ. 200

क्षयरोगः राजयक्ष्मापि कथ्यते। अयं रोगेऽपि भयंकरः कृमिजन्यः सम्प्रत्यपि महदायत्वेन साध्यो भवति। प्रथमचरणेऽस्य लक्षणं न जायते भौतिक परीक्षणे। वातावरणस्य प्रभावेनास्य सम्बन्धः। चन्द्रेण सह शनि राहु प्रभृतयः कारकत्वेन प्रयुक्ताः भवन्ति। अस्य विमर्शः प्रो. शुकदेवचतुर्वेदन सम्यक् कृतोऽस्ति।

सामुद्रिक शास्त्रीय विधानेनापि विभिन्नलक्षणैः करस्थ चिह्नैः रोगादीनां ज्ञानं भवति। किदृशेन चिह्नेन किदृशः रोगोभवतीत्यस्य निर्धारणार्थ विभिन्न नियमाः योगाश्च सामुद्रिके प्राप्यन्ते। प्रो. ओ.पी. वर्मा महोदयेन हस्तरेखाद्वारा। रोगनिर्णय, डॉ. नारायणदत्त श्रीमाली–हस्तरेखा विज्ञान, डॉ. राजेश दीक्षित वृहद्हस्तरेखाशास्त्र, पं. कालिका प्रसाद मिश्र–सामुद्रिकरहस्यम्, पं. भोजराज द्विवेदी अङ्गुष्ठ से भविष्य ज्ञान, प्रभृतिभिः नवीनकालेऽपि विस्तृतान्वेषणं कृतम्। हस्तपरीक्षानामके ग्रन्थे श्रीनिवासमहादेवन महोदयेन भारतीय पाश्चात्य सामुद्रिकयोः समन्वयं विधाय शुभाशुभनिर्धारणार्थ महानायशः कृतः। अत्र रोगाभिज्ञानार्थं सामुद्रिकलक्षणं यथा–

1. यदि स्वास्थ्य रेखा खण्डिता भवेत्।
2. आयुर्दायरेखा हस्तद्वये छिन्ना खण्डिता च स्यात्।
3. जीवनरेखा खण्डिता छिन्ना च भवेत्।
4. मातृरेखापि खण्डिता छिन्ना च भवेत्।
5. एतासु द्वीपचिह्न, तारकचिह्न वक्ररेखा, कृष्णतिलादि चिह्न तस्मिन् वयसि रोगादीनां सूचनां प्रयच्छति।
6. यदि हस्तद्वयेकरतले करतले कृष्णचिह्नमायुरेखायां तथा कैंसर प्रभृतिभिः वातपित्तशूलयोगैः निधानं ज्ञेयम्।

अतएव हस्तरेखा माध्यमेन सामुद्रिककेन च रोगादीनां ज्ञानं कर्तुं शक्यते।

डॉ. हरिदत्तशर्मणा हस्तरेखा विश्वकोशे अर्बुदस्य लक्षणमपि ग्रहपर्वतगतरेखासु तारकचिह्न प्रमाणेन निरूपितम् एवं सामुद्रिकशास्त्रं बहुपूर्वमेव रोगादीनां लक्षणानि प्रकटयन्ति।

निम्नाङ्कित जातक अन्येषु रोगभावः मारकभावः मारकेशश्च सम्यक् निवेशितोऽस्ति। तदनुरोधेन विभिन्नरोगाः समुत्पत्ति कालात्पूर्वमेव निर्धारयितुं शक्यते।

जातकपारिजातः–वैद्यनाथः। बृहज्जातकम्–वराहः। सारावली–कल्याणवर्मा। सर्वार्थचिन्तामणिः–महिधरः। जैमिनीयसूत्रम्–जैमिनी। बृहत्पाराशरहोराशास्त्रम्– (भावफलाध्यायः मारकाध्यायः) पाराशरः। संकेत निधिः। जातकालंकारः– गणेशः। प्रश्नमार्गः। प्रश्नभूषणम् पं. जीवनाथ झा। उत्तरकालामृतम् (कारकखण्डम्, रलो. 10–11) – कालिदासः। अग्निवेश संहिता (चरक संहिता) चरकः। अथर्ववेदीय कौशिकसूत्रम् कौशिक ऋषिः। फलदीपिका मन्त्रेश्वर। मुहुर्त्तचिन्तामणिः नक्षत्र प्रकरणम् एते महत्त्वपूर्ण प्राचीनग्रन्थाः विशेषज्ञैः समीक्षणीयाः। यतः मुहूर्तचिन्तामणि नामके मुहूर्त ग्रन्थेऽपि नक्षत्रप्रकरणे कस्मिन्नक्षत्रे रोगारम्भेण किं फलमिति सम्यक् विधानं प्राप्यते। मानसागरी ङ्क–6, 4–1, रक्तविकारः। जातकपारिजात 2–77 व्रणः योगः। रक्तविकारः कुजचन्द्रराहुप्रभृतिनां दोषैः त्रिकसम्बन्धेन रक्त कैंसररूपेण परिणाम्यते।

**निदान पक्षः—** योगज्योतिष आयुर्वेद तन्त्रमन्त्रयन्त्रौषध्यादिभिः समवेतपरीक्षणैः निधनं विहाय सर्वे रोगाः शमनं प्रयान्ति। वीरसिंहावलोकः अस्मिन् रोगाभिज्ञानं निदानं मन्त्रतन्त्रयन्त्रौषध्यादिभिः शामक विधानमपि प्रस्तौति। अस्मिन् प्रयुक्तविधानेषु समवेतान्वेषणमपेक्षते। गदावलिः केवल रोगस्याभिज्ञाने प्रयतग्रन्थोऽस्ति।

**अनुष्ठानप्रकाशः—**असाध्यरोगाणां शामक विधानमेते प्राप्यन्ते।

**अहिर्बुध्न्यसंहिता—**साम्प्रतिकत्वे समवेतान्वेषणमपेक्षते यतः विभिन्न विषयाणां

**अथर्ववेदसंहिता—**समन्वयेन शामक विधानं प्रवर्त्तते

आरोग्यं भास्करादिच्छेदिति यमनियमासनप्राणायामध्यानैः साकं सूर्य सिनया रोगात्पत्तिरेव न स्यात्। प्रबल प्रारब्धेन यदि समुत्पद्यते तदा शान्तिकल्पोक्त विधानमेव शरणम्। कथं कस्य रोगस्थ शमनं भवेदिति साध्ये आयुर्विज्ञानेनासाध्ये महामृत्युञ्जयमन्त्रादीनामनुष्ठानेन साकं चिकित्साविधानं शग्णमिति। इत्यामविस्तरेण।

**सन्दर्भः**


1. सर्वार्थचिन्तामणिः, 9/37
2. प्रश्नमार्गः, अ. 23, श्लो. 26 टीकायाम् प्रो. शकुदेव श्तुर्वेदेन निरूपितम्।
3. जा.पा., 6/96
4. जा.पा., 8/92
5. बृ.पा., 18/24
6. बृ.पा., 18/25
7. सर्वार्थ चिन्तामणिः, अ. 5, श्लो. 42, 43, 34—36
8. जातक पारिजातः, श्लो. 6
9. फलदीपिका, 14/1
10. फलदीपिका, 14/10
11. सुश्रुतसंहिता, 15/48